**द्विशूर्प** त्रि० द्वाभ्यां शूर्पाभ्यां क्रीतम् "शूर्पादञन्यतरस्याम्" पा० अञ्ठञौ वा "अध्यर्द्धपूर्वद्विगोर्लुक्" पा० तयोः लुक्। द्वाभ्यां शूर्पाभ्यां क्रीते, द्वयोः शूर्पयोः समाहारः। द्विशूर्पी तया क्रीतमिति विग्रहे ठञेव न अञ् शूर्पान्तत्वेऽपि प्रत्ययविधौ तदन्तग्रहणनिषेधात्। ठञश्च न लुक् तस्य द्विगुनिमित्तत्वाभावात् "परिमाणान्तस्येति" पा० उत्तरपदवृद्धिः। द्विशौर्पिक तत्रार्थे त्रि० स्त्रियां ङीप्।

**द्विशृङ्गिका** स्त्री द्वे शृङ्गे इव फले अस्याः कप् अतइत्त्वम्। मेढ्रशृङ्ग्यां पारस्करनिघ०।

**द्विष** वैरे अदा० उभ० सक० अनिट्। द्वेष्टि द्विष्टे—अद्विषत्—अद्विषुः। अद्विक्षत् त दिद्वेष दिद्विषे। "यः सर्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्। नाभिनन्दति न द्वेष्टि" "न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते" गीता "ततोऽद्विषु निरालोके खेभ्योऽन्येभ्यश्च राक्षसाः" भट्टिः "संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिम्" मनुः आर्षत्वात् नुम्।

**द्विष्** त्रि० द्वेष्टि द्विष—क्विप्। शत्रौ अमरः। "रक्ष्यान्वेषणदक्षाणां द्विषामामिषतां ययौ" रघुः।

**द्विष** त्रि० द्विष—कर्त्तरि क। द्वेषकारके शत्रौ "तन्मित्रपूजा तदरिद्विषत्वम्" वृ०सं०७८अ०।

**द्विषत्** त्रि० "द्विषोऽमित्रे" पा० प्रथमासामानाधिकरण्येऽपि द्विष—शतृ। द्वेषकारके शत्रौ अमरः "पार्थेनाश्च द्विषन्नुसरम्" माघः।

**द्विषन्तप** त्रि० द्विषन्तं तापयति "द्विषत्परयोस्तापेः खच्" पा० खचि ह्रस्वः "अरुर्द्विषदजन्तस्य" पा० मुम् संयोगान्त्यतकारस्य लोपः। शत्रुतापके। षटषटीग्रहणाल्लिङ्गविशिष्टपरिभाषा अनित्या तेन द्विषतीं तापयतीत्यादौ न खच् किन्तु अण्। द्विषतीताप इत्येव स्त्रि० कौ

**द्विषष्** त्रि० ब०व०। द्विगुणिताः षट्। द्वादश्सु "तुष्टायां तोषमापन्नोऽजनयद्द्वादशात्मजान्। इत्युपक्रमे सुदेवोरोचनो द्विषट्" भाग० ४।१।७

**द्विषाष्टिक** त्रि० द्वे षष्टी अधीष्टो भृतो भूतो भावी वा टञ् उत्तरपदवृद्धिः। द्वे षष्टी दिनानि व्याप्य १भृते २भूते ३भाविनि च। [ उदा० द्रष्टव्यम्।

**द्विषेण्य** त्रि० द्विष—एण्यन् किच्च। द्वेषशीले अद्विषेण्यशब्दे

**द्विष्ट** त्रि० द्विष—कर्मणि क्त। द्वेषविषये "निष्टत्तिस्तु भवेद्द्वेषात् द्विष्टसाधनताधियः" भाषा० द्वेषशब्दे द्रष्टव्यम्। अष्ट+पृषो०। २ताम्रे न० सारसुन्दरी।

**द्विष्ठ** त्रि० द्वयोस्तिष्ठति स्था—क "अम्बाम्बेति" पा० षत्वम्। १द्वयोः स्थिते संयोगविभागादौ २स्थानद्वयस्थिते "द्विष्ठास्तिथिक्षयाभ्यस्तास्चान्द्रवासरभाजिताः" सू०सि०। द्विः द्विवारं स्थितम् वा विसर्गलोपे न षत्वम। द्विस्थ द्विवारस्थिते त्रि० "त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवा हृतो लब्ध्या द्विस्था भूरूनयुता दलिता बाधे तयोः स्याताम्" लीला०।

**द्विस्** अव्य० क्रियागणने द्वि+सुच्। द्विवारक्रियादौ "द्विः शरं नाभिसन्धत्ते द्विः स्थापयति नाश्रितान्। द्विर्ददाति न चार्थिभ्यो रामो द्विर्नैव भाषते"। "त्रिःप्राश्यापो द्विरुन्मृज्य सुखमेतान्युपस्पृशेत्" ति०त० "द्विःप्रमृज्यात्ततो मुखम्" मनुः।

**द्विसम** त्रि० द्वे समे परिमाणमस्य ठञ् तस्य लुक्। १द्विवर्षपरिमाणे। द्विसममधीष्ट इत्यादौ ठञ् "परिमाणान्तस्यासंज्ञाशाणयोः" पा० सू० कालपरिमाणस्याग्रहणम् "संख्यायां संवत्संख्यस्य च" पा० संवत्सरस्य पृथग्ग्रहणात् नोत्तरपदवृद्धिः, अध्यर्द्धेत्यादिना न लुक् अस्य ठञो द्विगुनिमित्तत्वाभावात्। द्वैसमिक द्विसमव्यापके ज्वरादौ।

**द्विस(सा)हस्र** त्रि० द्वाभ्यां सहस्राभ्यां क्रीतम् द्वे सहस्रे परिमाणमस्य वा अण्। ठञादेरपवादः तस्य वा लुक्। १द्विसहस्रक्रीते २द्विसहस्रपरिमिते च। द्विसहस्रपरोदायः स्त्रियै देयो धनस्य तु" दायभा०। २द्विगुणितसहस्रे च

**द्विसहस्राक्ष** पु० द्विराहत्तं सहस्रं शाक० त० द्विसहस्रं द्विगुणसहस्रमक्षीणि यस्य षच् समा०। अनन्ते शेष० तस्य सहस्रवक्त्रत्वेन प्रतिमुखं द्विद्विनेत्रत्वात् तथात्वम्।

**द्विसांवत्सरिक** त्रि० द्विवत्सरं भूतादि ठञ्। "संख्यायां संवत्सरसंख्यस्य च" पा० उत्तरपदवृद्धिः। द्विवर्षं व्याप्य भूतादौ। [ द्विसप्तति व्याप्य भूतादौ।

**द्विसाप्ततिक** त्रि० द्विसप्ततिं भूतादि ठञ् उत्तरपदवृद्धिः

**द्विसीत्य** त्रि० द्विवारं सीतया हलेन समितं "नौवयोधर्मेत्यादिना" पा० यत्। द्विवारं कृष्टक्षेत्रे।

**द्विसुवर्ण** त्रि० द्वाभ्यां सुवर्णाभ्यां क्रीतं ठक् अध्यर्द्धेति लुक् १द्वाभ्यां सुवर्णाभ्यां क्रीते। द्विसुवर्णेन क्रीतमिति विग्रहे तु न लुक् ठको द्विगुनिमित्तत्वाभावात् परिमाणान्तत्वादुत्तरपदवृद्धिः। द्विसौवर्णिक द्विसुवर्णेन क्रीते। समाहारद्विगुः। २सुवर्णद्वये स्त्री ङीप्।

**द्विस्तना** स्त्री द्वौ स्तनाविव स्तदवयवौ यस्याः अस्वाङ्गत्वान्न ङीष्। इष्टकाकृतिभेदे सा च कात्या० श्रौ० १६।४ सूत्रे दर्शिता। इष्टकाशब्दे ९९२ पृ० द्रष्टव्यम्। "स्तनाविवाग्रे पूरयति द्विस्तनामष्टस्तनामेके" कात्या०श्रौ०१६।४।१,२।